ভজ গোবিন্দং ভজ গোবিন্দং
গোবিন্দং ভজ মূঢ়মতে ।
সংপ্রাপ্তে সন্নিহিতে কালে
নহি নহি রক্ষতি ডুক্রিন্করণে ।। ১ ।।
মূঢ় জহীহি ধনাগমতৃষ্ণাং
কুরু সদ্বুদ্ধিম মনসি বিতৃষ্ণাম ।
য়ল্লভসে নিজ কর্মোপাত্তং
বিত্তং তেন বিনোদয় চিত্তম ।। ২ ।।
নারী স্তনভর নাভীদেশং
দৃষ্ট্বা মা গা মোহাবেশম ।
এতন্মাংস বসাদি বিকারং
মনসি বিচিন্তয়া বারং বারম ।। ৩ ।।
নলিনী দলগত জলমতি তরলং
তদ্বজ্জীবিত মতিশয় চপলম ।
বিদ্ধি ব্য়াধ্য়ভিমান গ্রস্তং
লোকং শোকহতং চ সমস্তম ।। ৪ ।।
য়াবদ-বিত্তোপার্জন সক্তঃ
তাবন-নিজপরিবারো রক্তঃ ।
পশ্চাজ্জীবতি জর্জর দেহে
বার্তাং কোপি ন পৃচ্ছতি গেহে ।। ৫ ।।
য়াবত-পবনো নিবসতি দেহে
তাবত-পৃচ্ছতি কুশলং গেহে ।
গতবতি বায়ৌ দেহাপায়ে
ভার্য়া বিভ্য়তি তস্মিন কায়ে ।। ৬ ।।
বাল স্তাবত ক্রীডাসক্তঃ

www.yousigma.com

তরুণ স্তাবত তরুণীসক্তঃ ।
বৃদ্ধ স্তাবত-চিন্তামগ্নঃ
পরমে ব্রহ্মাণি কোপি ন লগ্নঃ ।। ৭ ।।
কা তে কান্তা কস্তে পুত্রঃ
সংসারোয়মতীব বিচিত্রঃ ।
কস্য় ত্বং বা কুত আয়াতঃ
তত্বং চিন্তয় তদিহ ভ্রাতঃ ।। ৮ ।।
সত্সনগত্বে নিস্সনগত্বং
নিস্সনগত্বে নির্মোহত্বম ।
নির্মোহত্বে নিশ্চলতত্ত্বং
নিশ্চলতত্বে জীবন্মুক্তিঃ ।। ৯ ।।
বয়সি গতে কঃ কামবিকারঃ
শুষ্কে নীরে কঃ কাসারঃ ।
ক্ষীণে বিত্তে কঃ পরিবারঃ
ঘ্নয়াতে তত্ত্বে কঃ সংসারঃ ।। ১০ ।।
মা কুরু ধনজন য়ৌবন গর্বং
হরতি নিমেষাত-কালঃ সর্বম ।
মায়াময়মিদম-অখিলং হিত্বা
ব্রহ্মপদং ত্বং প্রবিশ বিদিত্বা ।। ১১ ।।
দিন য়ামিন্য়ৌ সায়ং প্রাতঃ
শিশির বসন্তৌ পুনরায়াতঃ ।
কালঃ ক্রীডতি গচ্ছত্য়ায়ুঃ
তদপি ন মুন্চত্য়াশাবায়ুঃ ।। ১২ ।।
দ্বাদশ মংজরিকাভির শেষঃ
কথিতো বৈয়া করণস্য়েষঃ ।

উপদেশো ভূদ-বিদ্য়া নিপুণৈঃ
শ্রীমচ্ছংকর ভগবচ্ছরণৈঃ ।। ১৩ ।।
কা তে কান্তা ধন গত চিন্তা
বাতুল কিং তব নাস্তি নিয়ন্তা ।
ত্রিজগতি সজ্জন সন্গতিরেকা
ভবতি ভবার্ণব তরণে নৌকা ।। ১৪ ।।
জটিলো মুণ্ডী লুন্জিত কেশঃ
কাষায়াম্বর বহুকৃত বেষঃ ।
পশ্যন্নপি চ ন পশ্যতি মূঢঃ
উদর নিমিত্তং বহুকৃত বেষঃ ।। ১৫ ।।
অন্গং গলিতং পলিতং মুণ্ডং
দশন বিহীনং জাতং তুণ্ডম ।
বৃদ্ধো য়াতি গৃহীত্বা দণ্ডং
তদপি ন মুন্চত্য়াশা পিণ্ডম ।। ১৬ ।।
অগ্রে বহ্নিঃ পৃষ্ঠে ভানুঃ
রাত্রৌ চুবুক সমর্পিত জানুঃ ।
করতল ভিক্ষস-তরুতল বাসঃ
তদপি ন মুন্চত্য়াশা পাশঃ ।। ১৭ ।।
কুরুতে গন্গা সাগর গমনং
ব্রত পরিপালনম-অথবা দানম ।
ঞ্নয়ান বিহীনঃ সর্বমতেন
ভজতি ন মুক্তিং জন্ম শতেন ।। ১৮ ।।
সুরমন্দির তরু মূল নিবাসঃ
শয়্যা ভূতলম-অজিনং বাসঃ ।
সর্ব পরিগ্রহ ভোগত্যাগঃ

কস্য় সুখং ন করোতি বিরাগঃ ।। ১৯ ।।
য়োগরতো বা ভোগরতো বা
সন্গরতো বা সন্গবিহীনঃ ।
য়স্য় ব্রহ্মণি রমতে চিত্তং
নন্দতি নন্দতি নন্দত্য়েব ।। ২০ ।।
ভগবদ্গীতা কিন্চিদধীতা
গন্গা জললব কণিকা পীতা ।
সকৃদপি য়েন মুরারী সমর্চা
ক্রিয়তে তস্য় য়মেন ন চর্চা ।। ২১ ।।
পুনরপি জননং পুনরপি মরণং
পুনরপি জননী জঠরে শয়নম ।
ইহ সংসারে বহু দুস্তারে
কৃপয়াপারে পাহি মুরারে ।। ২২ ।।
রথ্য়া চর্পট বিরচিত কন্থঃ
পুণ্য়াপুণ্য় বিবর্জিত পন্থঃ ।
য়োগী য়োগ নিয়োজিত চিত্তঃ
রমতে বালোন্মত্তবদেব ।। ২৩ ।।
কস্ত্বং কোহং কুত আয়াতঃ
কা মে জননী কো মে তাতঃ ।
ইতি পরিভাবয় নিজ সংসারং
সর্বং ত্য়ক্ত্বা স্বপ্ন বিচারম ।। ২৪ ।।
ত্বয়ি ময়ি সর্বত্রৈকো বিষ্ণুঃ
ব্য়র্থং কুপ্য়সি ময়্য়সহিষ্ণুঃ ।
ভব সমচিত্তঃ সর্বত্র ত্বং
বান্ছস্য়চিরাদ-য়দি বিষ্ণুত্বম ।। ২৫ ।।

www.yousigma.com

শত্রৌ মিত্রে পুত্রে বংধৌ
মা কুরু য়ত্নং বিগ্রহ সন্ধৌ ।
সর্বস্মিন্নপি পশ্য়াত্মানং
সর্বত্রোত-সৃজ ভেদাগ্ন্য়ানম ।। ২৬ ।।
কামং ক্রোধং লোভং মোহং
ত্য়ক্ত্বাত্মানং পশ্য়তি সোহম ।
আত্মগ্ন্য়নান বিহীনা মূঢাঃ
তে পচ্য়ন্তে নরক নিগূঢাঃ ।। ২৭ ।।
গেয়ং গীতা নাম সহস্রং
ধ্যেয়ং শ্রীপতি রূপম-অজস্রম ।
নেয়ং সজ্জন সঙ্গে চিত্তং
দেয়ং দীনজনায় চ বিত্তম ।। ২৮ ।।
সুখতঃ ক্রিয়তে রামাভোগঃ
পশ্চাদ্ধন্ত শরীরে রোগঃ ।
য়দ্য়পি লোকে মরণং শরণং
তদপি ন মুন্চতি পাপাচরণম ।। ২৯ ।।
অর্থমনর্থং ভাবয় নিত্য়ং
নাস্তি ততঃ সুখ লেশঃ সত্য়ম ।
পুত্রাদপি ধনভাজাং ভীতিঃ
সর্বত্রৈষা বিহিতা রীতিঃ ।। ৩০ ।।
প্রাণায়ামং প্রত্য়াহারং
নিত্য়ানিত্য় বিবেক বিচারম ।
জাপ্য়সমেত সমাধি বিধানং
কুর্ব বধানং মহদ-অবধানম ।। ৩১ ।।
গুরু চরণাম্বুজ নির্ভরভক্তঃ

সংসারাদ-অচিরাদ-ভব মুক্তঃ ।
সেন্দিয় মানস নিয়মাদেবং
দ্রক্ষ্যসি নিজ হৃদয়স্থং দেবম ।। ৩২ ।।
মূঢঃ কশ্চিন বৈয়াকরণো
ডুকৃঙ্করণাধ্যয়ন ধুরীণঃ ।
শ্রীমচ্ছংকর ভগবচ্ছিষ্যৈঃ
বোধিত আসীচ্ছোদিত করণৈঃ ।। ৩৩ ।।

www.yousigma.com